# शिक्षाव्याकरणप्रातिशाख्यशास्त्रदिशा अनुस्वारविवेकः

**डॉ. देवाशीष पात्र**

प्रकल्प-सहाय्यक:, संस्कृतविभाग:, जादवपुर विश्वविद्यालय:

**सारसंक्षेपः (Abstract)**

'दुष्टः शब्दः स्वरतो वर्णतो वा...' इत्यादिवचनैः शास्त्रेषु अपशब्दप्रयोगः सर्वथा निन्द्यते। न केवलम् उदात्तादिस्वरभ्रमे वर्णान्तरप्रयोगे वा शब्दा दुष्टा इति कथ्यन्ते अपि तु उच्चारमस्थानभ्रष्टत्वात् कलत्वदोषेण मात्रास्खलनत्वात् धात्मत्वादिदोषैरपि शब्दानामपशब्दत्वं जायते। अतः अपशब्दप्रयोगेन यथा नः अवाग्योगविदः अज्ञानशरणाः स्याम: इत्यर्थमस्माभिः शब्दानां यथार्थस्वरूपं ज्ञात्वैव ते प्रयोक्तव्याः। शब्दज्ञानञ्च वर्णज्ञानापेक्षि, वर्णसंघातेनैव शब्दनिष्पत्तेः। संस्कृतवर्णसमाम्नाये त्रिषष्टिषु चतुषष्टिषु वा वर्णेषु अनुस्वारोऽन्यतमः। अथः शिक्षाव्याकरणादिषु अनुस्वारः पृथग्वर्णत्वेनादाय तच्छरूपं वैशद्येन स्पष्टीकृतं ग्रन्थकृद्भिः। परन्त्विदानीं तच्छरूपं न ज्ञात्वैव बहुत्रास्माभिः अपभ्रंशरूपः प्रयोगः क्रियते। अस्मिन् निबन्धे शास्त्रीयदिशा तस्य स्वरूपं पर्यालोच्यते येन अनुस्वारस्य प्रकृतस्वरूपं ज्ञात्वा यथार्थः प्रयोगः कर्तुं शक्यते।

कुटशब्दाः – अनुस्वारः, प्रातिशाख्यम्, शिक्षा, व्याकरणम्, वर्णोच्चारणम् ।

**उपोद्घातः**

"एकः शब्दः सम्यक् ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके च कामधुग् भवति"[1] इति महाभाष्यवचनानुसारेण एकस्यैव शब्दस्य शास्त्रानुसारेण यथार्थतया ज्ञाने तस्य सम्यक्प्रयोगे च इहलोके अन्यत्र च मानवः कामधुग् भवति। शब्दज्ञानञ्च वर्णज्ञानापेक्षि, वर्णसंघातेनैव शब्दनिष्पत्तेः। वेदार्थज्ञापनाय प्रवृत्तेषु वेदाङ्गेषु तथा प्रातिशाख्यशास्त्रेषु तस्मादेव आदौ वर्णसमाम्नायस्तथा वर्णविचारः परिलक्ष्यते। तैत्तिरीयोपनिषदः शिक्षावल्ल्याम् आदौ "ओम् शिक्षां व्याख्यास्यामः"[2] इति प्रतिज्ञाया अनन्तरं "वर्णः स्वरो मात्रा बलं साम सन्तानञ्चेति" आदौ वर्णः समुल्लिखितः। व्याकरणस्य मूर्ध्निभूतस्य पाणिनीयव्याकरणस्य सूत्रपाठात् प्रागेव अस्माभिः माहेश्वरसूत्ररूपेण वर्णसमाम्नायः पठ्यते। शिक्षाकृतो वैयाकरणाः प्रातिशाख्यकृतश्च वर्णसंख्यावर्णस्वरूपादिविषये सदैकमत्यं न भजन्ते। वर्णाः प्रधानतः स्वरव्यञ्जनभेदेन द्विधा विभक्ताः शास्त्रकृद्भिः। शिक्षाग्रन्थेषु व्याकरणग्रन्थेषु प्रातिशाख्यग्रन्थेषु च अनुस्वारं विविधोपायेन विचार्य्य तस्य यथार्थस्वरूपं समुद्घाटितं ग्रन्थकारैः।

**शिक्षाग्रन्थेषु अनुस्वारः**

"वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा"[3] इति सायणाचार्यप्रदत्तात् शिक्षालक्षणात् तेषां वर्णविचारमाहात्म्यं प्रतीयत एव। वर्ण्यन्ते व्यक्तीक्रियन्ते ध्यन्यन्त इति वर्णा अकारादय इति हि व्युत्पत्तिः। शिक्षाग्रन्थेषु अस्माभिरनुस्वारः पृथग्वर्णरूपेण प्राप्यते। स्वरम् अनु भवति इति अनुस्वारः। अकाराद्यनुगमनेन अनुस्वारः इति वा। तस्मादुच्यते शिक्षाप्रकाशे 'स्वरान् अकारादीन् अनु लक्षीकृत्य प्राप्तोऽन्वर्थसंज्ञः' इति। पाणिनीयशिक्षायां प्राकृते संस्कृते चापि साकल्येन त्रिषष्टिः चतुष्षष्टिः वर्णान् वा स्वीकृत्य वर्णगणनाप्रसङ्गे उच्यते –

"स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः।।

अनुस्वारो विसर्गश्च ᳲ क ᳲ पौ चापि पराश्रितौ "।[4] इति।

अतः अत्रानुस्वारः पृथग्वर्णत्वेनैव स्वीकृतः। किञ्च स वर्णः पराश्रिततया प्रतिपादितः, पराश्रितो नाम अनुस्वारः एकाकी पृथग्रूपेण कदापि वाक्ये न प्रयुज्यते, सर्वदा केनचित् स्वरेण स प्रयुज्यते। वर्णरत्नप्रदीपिकाशिक्षायामपि त्रिषष्टिवर्णसु अनुस्वारः पृथग्वर्णरूपेणाङ्गीकृतः –

"स्पर्शानां पञ्चमैर्योगे चत्वारश्च यमाः स्मृताः।
अनुस्वारो विसर्गश्च जिह्वामूलीय एव च"।।[5] इति।

एवं षोडशश्लोकीशिक्षायामपि –

"त्रयस्त्रिंशद्धशा वर्णाः स्वराः द्वाविंशतिः यमाः ।

चत्वारश्च विसर्गोऽनुस्वारः ᳲ क ᳲ पस्त्रिषष्टिका" ।।[6] इति

सामवेदीयायां नारदीयशिक्षायाम् अनुस्वारस्य स्वरूपमुच्यते –

"आपद्यते मकारो रेफोष्मसु प्रत्ययेष्वनुस्वारम्"[7] इति।

अर्थात् मकारो रेफेष्मसु प्रत्ययेषु परतः अनुस्वारत्वमापद्यते।

उपर्युक्तेषु शिक्षाग्रन्थेषु कुत्रापि स्वरवर्णगणनायामनुस्वारो नोल्लिखितः। शिक्षाग्रन्थेषु प्रायेण अनुस्वारः व्यञ्जनवर्णरूपेण प्रतिपादित इति प्रतीयते। किञ्च स पराश्रितः व्यञ्जनप्रकृतिकश्च इति बोध्यम्। अथर्ववेदीयायां माण्डूकीशिक्षायां त्रिविधः अनुस्वारः कर्तव्यः इति निगदितम्। ते यथा – ह्रस्वानुस्वारः, दीर्घानुस्वारः, प्लुतानुस्वारश्च। तत्रोच्यते –

"अनुस्वारास्तु कर्तव्या ह्रस्वदीर्घप्लुतास्त्रयः।
अयँ राजा पशोर्मांसं क्षत्रियाणां धनूँषि च ।।[8] इति

अथर्ववेदीयायां माण्डूकीशिक्षायां ह्रस्वदीर्घप्लुतरूपेण अनुस्वारे प्रतिपादितेऽपि अयम न स्वरवर्णत्वेन भाव्यः। माण्डूकीशिक्षायाः परिपूरकरूपे वर्णपटले तु स्पष्टतयोद्घोषितं यत् स्वराः द्वाविंशतिरेव, अयोगवाहा दश एव, अनुस्वारस्य च अयोगवाहरूपेण सिद्धिः।

व्यासशिक्षायां द्विविधः अनुस्वारः स्वीकृतः। वेदतैजसाख्ये व्यासशिक्षाभाष्ये उच्यते –

"द्वावनुस्वारौ तं ध्नन्तीति केवलः।
स ꣡शितमित्यत्र गकारसंयुतः"।। इति।

अर्थात् केवलः अनुस्वारः, गकारसंयुक्तः अनुस्वारश्च। कदा अनुस्वारस्य गुंकारश्रुतिर्दृश्यते तच्च अग्रे वक्ष्यते।

**व्याकरणे अनुस्वारः**

वेदार्थस्पष्टीकरणाय प्रवृत्तेषु षट्सु वेदाङ्गेषु वेदपुरुषस्य मुखत्वेनाङ्गीकृतं व्याकरणवेदाङ्गम् अन्यतमत्वेन प्रधानत्वेन च स्वीक्रियते। तस्मादुच्यते पतञ्जलिना – "प्रधानं च षटस्वङ्गेषु व्याकरणम्"[9] इति। संस्कृतभाषायाः व्याकरणेषु मूर्ध्निभूतो हि वर्तते त्रिमुनिव्याकरणमित्यपराभिधः पाणिनीयव्याकरणसम्प्रदायः। पाणिनीयव्याकरणसम्प्रदायेऽपि वर्णसंख्या, वर्णोच्चारणस्थानानि वर्णस्वरूपमित्यादीनि सम्यक् प्रतिपादितानि। भगवता पाणिनिना प्राप्तेषु वर्णसमाम्नायरूपमाहेश्वरसूत्रेषु इत्संज्ञकवर्णान् अतिरिच्य साक्षात् त्रिचत्वारिंशद् वर्णा उपदिष्टाः। एभिरेव वर्णैः ह्रस्वदीर्घप्लुतादिभेदेन अन्याः वर्णाः सम्पद्यन्ते। पाणिनीयव्याकरणसम्प्रदाये अनुस्वारस्तु प्रकृत्या व्यञ्जनमेव, प्राधान्येन पाणिनिना "मोऽनुस्वारः"[10] इति सूत्रेण व्यञ्जनवर्णे परतः पदान्तस्य मः अनुस्वारो विहितः। अपि च "नश्चापदान्तस्य झलि"[11] इति सूत्रेण अपदान्तस्य नकारस्य मकारस्य च झलि परतः अनुस्वारः विधीयते। तेन प्रकृत्या स तु व्यञ्जमेवेति प्रतीयते। "मोऽनुस्वारः" इति सूत्रेण 'हरिम् वन्दे' इत्युदाहरणे व्यञ्जनवर्णस्य वकारस्य परतः स्थितौ पदान्तस्य मः अनुस्वारादेशेन 'हरिं वन्दे' इति रूपं निष्पद्यते। 'यशान् सि' इत्यवस्थायां "नश्चापदान्तस्य झलि" इति सूत्रेण झलि परतः अपदान्तस्य नकारस्य अनुस्वारादेशेन 'यशांसि' इति रूपं प्राप्यते। अतः एभ्य उदाहरणेभ्यः प्रतीयते यत् व्याकरणनिकाये अनुस्वारः व्यञ्जनत्वेनाङ्गीकृतः। पाणिनीयव्याकरणे नुम् इत्यनेनापि कुत्रचिद् अनुस्वार एव परामृष्टः। तस्माद् दीक्षितेन "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रे उच्यते – "नुम्ग्रहणमनुस्वारोपलक्षणार्थम्"[12] इति।

यथा पाणिनीयशिक्षायामनुस्वारः पराश्रितत्वेन प्रतिपादितः तथैव व्याकरणे अपि। भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याम् – "अं अः इत्यचः परावनुस्वारविसर्गौ"।[13] इति वचनेन अनुस्वारस्य पराश्रितत्वं प्रतिपादितम्। व्याकरणनिकाये अनुस्वारः अयोगवाह इत्यभिधयापि कथ्यते। न विद्यते योगो येषां वर्णसमाम्नाये ते अयोगाः नाम अनुपदिष्टाः। वाहयन्ति प्रयोगं निर्वाहयन्तीति वाहाः, अयोगाश्च ते वाहाः इति अयोगवाहाः। अर्थात् येषां वर्णसमाम्नाये उपदेशाभावेऽपि कार्यनिर्वाहकत्वमस्ति ते अयोगवाहाः। अनुस्वारोऽपि तथाभूतत्वात् सोऽपि अयोगवाहः। पाणिनीयशिक्षायामपि –

"अनुस्वारयमानां च नासिका स्थानमुच्यते।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः"॥[14]

इति श्लोकेन अनुस्वारः अयोगवाहवर्णरूपेण प्रतिपादितः।

**प्रातिशाख्ये अनुस्वारः**

प्रातिशाख्यशास्त्राणि अनुस्वारस्वरूपविषये किञ्चित् भिन्नं मतं प्रतिपादयन्ति। ऋग्वेदप्रातिशाख्ये "अनुस्वारो व्यञ्जनं वा स्वरो वा"[15] इति सूत्रेण अनुस्वारस्य व्यञ्जनत्वं तथा स्वरत्वं उभावेव प्रतिपाद्य "उत्तरेऽष्टा ऊष्माणः"[16] इति सूत्रे अनुस्वार ऊष्मवर्णरूपेण प्रतिपादितः। अनुस्वारस्तु कांश्चित् स्वरधर्मान् कांश्चित् व्यञ्जनधर्मान् च अङ्गीकरोति, तस्मात् शौनकेन अस्य उभयधर्मत्वं प्रतिपादितम्। उभयधर्मविशिष्टत्वात् उभयस्वभावः स्वरव्यञ्जनयोः पृथक् वर्णान्तरः अनुस्वारः शौनकेन अङ्गीकृतः। अनुस्वारस्य स्वरधर्माः यथा ह्रस्वदीर्घप्लुतत्वम् उदात्तानुदात्तस्वरित्वतञ्च। व्यञ्जनधर्माश्च अर्धमात्राकालता, स्वरवशेन उदात्तानुदात्तस्वरित्वधर्मत्वं संयोगश्च। अस्य उभयस्वरूपत्वात् ऋग्वेदप्रातिशाख्ये व्यञ्जनशब्देन स्वरशब्देन वा विहिते नियमे अनुस्वारो न प्रवर्तते, स तु स्वशब्दग्रहणेन वर्णग्रहणेन च गृह्यते। अतः स्वरव्यञ्जनभिन्नः पृथग्वर्णः अनुस्वारः इति ऋग्वेदप्रातिशाख्यसिद्धान्तः।

तैत्तिरीयप्रातिशाख्ये "शेषो व्यञ्जनानि"[17] इति सूत्रेण अनुस्वारः व्यञ्जनत्वेन स्वीकृतः। व्यञ्जनत्वेन स्वीकृतेऽपि तत्रानुस्वारस्य ह्रस्वादिस्वरधर्माः विहिता दृश्यन्ते। "अनुस्वारश्च"[18] इति सूत्रेण तैत्तिरीयप्रातिशाख्ये द्विमात्रिके पूर्वे सति अनुस्वारस्य ह्रस्वत्वं तथा एकमात्राकालत्वम् उपदिष्टम्। उच्यते त्रिभाष्यरत्नाख्यां टीकायाम् – "...स्वरं प्रत्यङ्गविधानादनुस्वारस्य व्यञ्जनत्वम्। तथासति ह्रस्वार्धकालं व्यञ्जनमिति अर्धमात्रत्वं प्राप्तं तन्माभूदिति ह्रस्वत्वं विधीयते।"[19] इति। अस्यैव सूत्रस्यानुवादकाले कालाण्डमहाभागेनोच्यते – "The implication being the as in the preceding rules, *anusvāra* is here defined as having the quantity of a short vowel."[20]

वाजसनेयिप्रातिशाख्ये अनुस्वारं व्यञ्जनवर्णरूपेण स्वीकृत्य विकारभूतस्य तस्य स्वरूपं प्रतिपादितम्। तत्र "अनुस्वारं रोष्मसु मकारः"[21] इति सूत्रेण अनुस्वारो मकारस्य विकार इत्युच्यते। रेफोष्मसु परेषु मकारः अनुस्वारमापद्यते इति। 'अपाम् रसेन' इत्यतः 'अपां रसेन', 'देवम् सवितारम्' इत्यतः 'देवं सवितारम्' इत्यादीनि उदाहरणानि। "नुश्चान्तःपदेऽरेफे"[22] इत्यनेन सूत्रेण वाजसनेयिप्रातिशाख्ये पदमध्ये अरेफे परतः नकारः अनुस्वारो भवतीति विधीयते, प्रकृतसूत्रे चकारात् पदमध्यस्य मकारोऽप्यत्र गृहीतः। अत्रोच्यते भाष्यकृता उवटः – "नकारोऽनुस्वारमापद्यते। चशब्दान्मकारश्च"। यथा – 'हवीन् षि' इत्यतः 'हवींषि', 'पपिवान् सः' इत्यतः 'पपिवांसः' इत्यादीनि। अतः अनुस्वारः मकारप्रकृतिकः नकारप्रकृतिकश्च भवतीति वाजसनेयिप्रातिशाख्यसिद्धान्तः।

## अनुस्वारोच्चारणस्थानं तदुच्चारणविधिश्च

यस्मिन् स्थाने वर्णा उपलभ्यन्ते तद्ध्युच्चारणस्थानमित्युच्यते। येन च वर्णा निवर्त्यन्ते तत् करणमित्युचे। शास्त्रेषु वर्णानाम् अष्टौ उच्चारणस्थानानि स्वीकृतानि – उरः, कण्ठः, शिरः, जिह्वामूलं, दन्ताः, नासिका, ओष्ठौ, तालु च । उच्यते च पाणिनीयशिक्षायाम् – "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।

जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ।।"[23]

पाणिनीयशिक्षायाम् अनुस्वारस्य नासिकास्थानम् उक्त्वा पुनः तम् अयोगवाहरूपेण प्रतिपाद्य पराश्रितत्वात् आश्रयस्थानमपि तत्स्थानरूपेण स्वीक्रियते। तेन अनुस्वारस्य स्थानद्वयं भवति – नासिका, आश्रितवर्णस्थानञ्च। यथा देवदत्तं वदति इत्युदाहरणे अनुस्वारस्य उच्चारणस्थानं नासिका दन्ताश्च, आश्रयभूतस्य तकारस्य दन्तस्थानत्वात। भणितं च पाणिनीयशिक्षायाम् –

"अनुस्वारयमानां च नासिकास्थानमुच्यते।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः।।"[24]

वाजसनेयिप्रातिशाख्ये "यमानुस्वारनासिक्यानां नासिके"[25] इति सूत्रेण अनुस्वारस्य उच्चारणस्थानं नासिका इति प्रतिपादितम्। अपि च "जिह्वामूलीयानुस्वारा हनुमूलेनेति"[26] इति सूत्रेण अनुस्वारस्य करणं हनुमूलमिति दर्शितम्। एवं शिक्षाप्रातिशाख्यव्याकरणशास्त्रेषु अनुस्वारस्य नासिकास्थानमेव निर्दिष्टम्। अतोऽनुस्वारो नासिकास्थानादेव उच्चारणीय इति शास्त्रसिद्धान्तः।

पाणिनीयशिक्षायां परसवर्णत्वाभावे नित्यस्थितस्यानुस्वारस्य उच्यते यत् अलाबुनिर्मिताया वीणाया यथा नादः श्रूयते दन्तमूल्यस्तादृशः अनुस्वारः कर्तव्यः ।[27] वैयाकरणनिकाये तु अनुस्वारस्य नासिकास्थानमेव प्रतिपादितम् – "नासिकानुस्वारस्य"[28] इत्यादिवचनेन। याज्ञवल्क्यशिक्षायामनुस्वारस्य विविधाः उच्चारणविधयः प्रतिपादिताः।

शुक्लयजुर्वेदे अनुस्वारस्य गुंकारोच्चारणं दृश्यते। अनुस्वारस्य नासिकास्थानत्वात् हनुमूलकरणत्वाच्च शुक्लयजुर्वेदे हनुमूलेन नासिकायां वर्णे उच्चारिते गुंकारश्रुतिर्दृश्यते। स च गुंकारध्वनिः ह्रस्वात् परं दीर्घरूपेण, दीर्घात् परं संयोगपरे च ह्रस्वरूपेण उच्चार्यते। याज्ञवल्क्यशिक्षायामनुस्वारस्य कदाचिदेकमात्रिकत्वं कदाचिच्च द्विमात्रिकत्वमपि प्रतिपादितमस्ति। यथा-

"वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः।
द्विमात्रिके मात्रिकः स्यात् संयोगाद्यश्च यो भवेत्।।"[29] इति।

याज्ञवल्क्यशिक्षाकृता त्रिविधस्य अनुस्वारोच्चारणस्य उदाहरणपुरस्सरं स्पष्टीकृतम्-

"अनुस्वारस्योपरिष्टात्संयोगो यत्र दृश्यते।
ह्रस्वं तं तु विजानीयात् स ꣳ स्थानमिति दर्शनम्।।"[30] इति

अनुस्वारादुत्तरं यत्र संयोगो वर्तते तत्रानुस्वारो ह्रस्वो भवति। स ꣳ स्थानमिति च निदर्शनम्। याज्ञवल्क्यशिक्षानुसारेण एकमात्रिकाद् द्विमात्रिकाद् वा वर्णादनुस्वारस्य ऋवर्णपरकव्यञ्जनोदये दीर्घोच्चारणं भवति। उच्यते च तत्र –

"अनुस्वारो द्विमात्रः स्यादृवर्णव्यञ्जनादिगः।
ह्रस्वाद् वा यदि वा दीर्घाद् देवाना ꣳ हृदये यथा"।।[31] इति।

अस्मिन्नुदाहरणे 'देवानां गुं हृदये' इत्यत्र ऋवर्णपरकस्य व्यञ्जनहकारस्य उदये दीर्घादपि नकारोत्तराकारात् परोऽनुस्वारो दीर्घ एव प्रयुज्यते, न तु ह्रस्वः।

अत्रोल्लेख्यं दीर्घाक्षरात् परोऽनुस्वारः सर्वदा ह्रस्व एव उच्चार्यते, तत्र च दीर्घत्वं विभाषया एवेति बोध्यव्यम्। तस्मादुच्यते याज्ञवल्क्येन-

"अनुस्वारस्तु यो दीर्घादक्षराद्यो भवेत् परः।
स तु ह्रस्वमिव ज्ञेयो मन्त्रेष्वेव विभाषया"।।[32] इति।

अत्रेदमवधेयं यदियं विभाषा हि व्यवस्थितविभाषा। तस्मात् पूर्वोक्तश्लोकेन येषु स्थलेषु दीर्घविधानमस्ति तेष्वेव मन्त्रेषु केवलं दीर्घो भवति अन्यत्र तु सर्वत्र अनेन विधिना ह्रस्वमेव तमवगन्तव्यम्। अतः मन्त्रातिरिक्तस्थलेषु ऋवर्णपरकव्यञ्जनोदयेऽपि दीर्घात् परश्चेदनुस्वारो न द्विमात्रिकः प्रयोज्यः, परन्तु ह्रस्व एवेति शिक्षाशास्त्रसिद्धान्तः।

**उपसंहारः**

अतोऽनुस्वारो अर्धमात्रिको मात्रिको द्विमात्रिको वा कोऽपि भवतु, परन्तु तस्योच्चारणन्तु नासिकाभ्यामेव क्रियते। तेन आदितोऽन्तपर्यन्तं नासिकास्थानादेव उच्चार्यमाणस्य ध्वनिविशेषस्य अनुस्वार इति व्यवहारः। यत्तु कैश्चित् अनुस्वारो रङ्ग एव इति मन्यते तन्न साधु, रङ्गस्य सर्वस्यापि नासिकास्थानाभावात्। अनुस्वारस्य यथार्थतया प्रयोगेन सुवक्ता भवितुकामश्चेत्तदा तच्छरूपं तु अवश्यमेव ज्ञेयम्। अनेन चानुस्वारस्य स्वरूपं वैशद्येन ज्ञातुं शक्यते। अनुस्वारस्य प्रकृतस्वरूपज्ञानेन यथार्थतया लोकव्यवहारः शक्यते सम्पादयितुम्। यद्यपि शिक्षाग्रन्थेषु प्रातिशाख्येषु विशिष्टस्थलेषु अनुस्वारस्यैकमात्रत्वं द्विमात्रं च विहितं परन्तु प्रकृत्या अयं वर्णः व्यञ्जनत्वात् साधारणतया अस्य अर्धमात्रत्वमेव अस्माभिः ज्ञेयम्। येषु स्थलेषु शास्त्रकृद्भिः ह्रस्वत्वादिकं सूत्रेण उपदिष्टं तादृशेषु एव स्थलेषु तथा ज्ञेयम्, नान्यत्र । महाभाष्यकृता पतञ्जलिना पस्पशाह्निके उच्यते- "पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते। तेभ्यस्तत्तत्स्थआनकरणानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते। तदद्यत्वे न तथा" इति। व्याकरणमत्र उपलक्षणम्। पुरा सर्वे अध्येतारः सर्वं वेदाङ्गशास्त्रमधीयन्ते स्म। व्याकरणतः शिक्षाशास्त्रतश्च वर्णानां स्थानकरणानुप्रदानादीन् ज्ञात्वैव ते वेदमपठन्। परन्तु अद्यत्वे तथा न भवति। लोकेऽपि अस्माभिः अनुस्वारस्य विकृतोच्चारणं परिलक्ष्यते। तस्मात् शिक्षाशास्त्राध्ययनाभावात् वर्णानां सम्यक्स्वरूपज्ञानाभावाच्च यथार्थं वर्णोच्चारणं न दृश्यते। अनुस्वारोऽपि नास्य व्यत्ययः। अधुना यैर्मन्त्रोच्चारणं क्रियते तत्र अनुस्वारोच्चारणं सम्यकरूपेण कदाचिन्न दृश्यते, तस्य स्वरूपज्ञानावात्, उच्चारणज्ञानाभावाच्च। अतः शास्त्रेभ्यः अनुस्वारस्य स्वरूपं यथार्थतया ज्ञात्वा प्रयोगः करिष्यते चेत् तत्र न अनिष्टापत्तेराशङ्का उदेतीति शिवम्।

---

[1] श्रुतिवचनमिदं महाभाष्ये एकःपूर्वपरयोरिति सूत्रे उद्धृतम्।

[2] तैत्तिरीयोपनिषद् १.१.१

[3] सायणाचार्यविरचिता ऋग्वेदभाष्यभूमिका

[4] पाणिनीयशिक्षा ४-५

[5] वर्णरत्नप्रदीपिकाशिक्षा १४

[6] षोडशश्लोकीशिक्षा २

[7] नारदीयशिक्षा २.४.४

[8] माण्डूकीशिक्षा ८.११

[9] महाभाष्यस्य पस्पशाह्निकम्

[10] अष्टाध्यायी ८.३.२३

[11] तदेव ८.३.२४

[12] वैयाकरणसिद्धान्तकौमुदी १९७

[13] तदेव संज्ञाप्रकरणम्

[14] पाणिनीयशिक्षा २२

[15] ऋग्वेदप्रातिशाख्यम् १.७

[16] तदेव १.१०
[17] तैत्तिरीयप्रातिशाख्यम् १/६
[18] तदेव १/३४
[19] तदेव त्रिभाष्यरत्नम्
[20] Taittiriyapratiśākhyam. Ed. W. caland. P-28.
[21] वाजसनेयिप्रातिशाख्यम् ४.१
[22] तदेव ४.२
[23] पाणिनीयशिक्षा १३
[24] तदेव २२
[25] वाजसनेयिप्रातिशाख्यम्. १.३४
[26] तदेव १.८३
[27] पाणिनीयशिक्षा २३
[28] वैयाकरणसिद्धान्तकौमुदी संज्ञाप्रकरणम्
[29] याज्ञवल्क्यशिक्षा २.४२
[30] तदेव २.४७
[31] तदेव २.४८
[32] तदेव २.४९

## निर्वाचितग्रन्थपञ्जी

घोषः, म. (सम्पा.) (१९३८). *पाणिनीयशिक्षा*. क्यालकाटा, पश्चिम वङ्गालः इउनिभार्सिटि अब क्यालकाटा.

झा, उ. (सम्पा.) (१९८९). याज्ञवल्क्यशिक्षा. वाराणसी, उत्तरप्रदेशः चौखाम्बा ओरियेन्टाला.

नेने, ग. शा. (सम्पा) (१९७७) वैयाकरणसिद्धान्तकौमुदी भट्टोजिदीक्षितस्य. वाराणसी, उत्तरप्रदेशः चौखैम्बा संस्कृत सिरिज ऑफिस.

पाठकः, ज. (सम्पा.) (२०१५). *अथर्ववेदप्रातिशाख्यम् अथवा अथर्ववेदीया चतुरध्यायिका*. वाराणसी, उत्तरप्रदेशः चौखाम्बा विद्याङ्वनम्.

भगवद्दत्तः (सम्पा) (१९२१). *माण्डूकीशिक्षा*. नइ दिल्ली, दिल्लीः मेहरचन्द लछमनदास पब्लिकेशन्स.

भिसे, इउ. आर. (सम्पा.) (१९८६). *नारदीयशिक्षा*. पुणा, महाराष्ट्रः भाण्डारकर ओरियेन्टाल रिसर्च इनष्टिटिउट.

वर्मा, वी. (सम्पा.) (१९७०). *ऋग्वेदप्रातिशाख्यम्*. वाराणसी, उत्तरप्रदेशः चौखम्बा संस्कृत प्रतिष्ठान.

वर्मा, सि. (१९६१). *क्रिटिकल स्टाडिज् इन द्य फोनेटिक अबजर्वेशन अब इन्डियन ग्रामारियन्स*. नइ दिल्ली, दिल्लीः मुन्सिराम मनोहरलाल ओरियेन्टाल पब्लिशार्स एण्ड वुकसेलार.

वसु, श. (सम्पा.) (१८९७). *अष्टाध्यायी*. वेनारस, उत्तरप्रदेशः सिन्धु चरण वोस.

शर्मा, वि. (सम्पा.) (१९३०). *तैत्तिरीयप्रातिशाख्यम्*. माद्रास, तमिलनाडुः इउनिबर्सिटि अब माद्रास.

शर्मा, वि. (सम्पा.) (१९३४). *वाजसनेयिप्रातिशाख्यम्*. माद्रास, तमिलनाडुः इउनिबर्सिटि अब माद्रास.

सांख्यवेदान्ततीर्थ, द. (सम्पा.) (२००८). *तैत्तिरीयोपनिषत्*. कलकाता, पश्चिमवङ्गालः देव साहित्य कुटिर प्राइभेट लिमिटेड.